उपशास्त्री - II खण्ड साहित्य - तृतीय - पत्रम्
काव्यदीपिका

Saathi

Date __/__/__

प्र० (1) - अतिशयोक्तिरलङ्कारस्य किं स्वरूपम् ?

उत्तरम् - सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ।
प्रकृतस्य निगरणेनाभेदज्ञानमप्रकृतस्य अध्यवसायः ।
तस्य च उत्प्रेक्षायाम् - प्रस्तुतस्यानिश्चितत्वेन निर्देशात् साध्यत्वम् । इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वमित्यनयोर्भेदः । निगरणञ्च उभयत्रापि समानमेव ।

प्र० (2) - तुल्ययोगिताऽलङ्कारस्य किं स्वरूपम् ?

उत्तरम् - पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
केवलं प्रस्तुतानामप्रस्तुतानां वा एकधर्मसम्बन्धः तुल्ययोगिता । कुमारसम्भवे यथा -
यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् ॥

Renu Devi
14/09/20
राधा उमाकांत सं० महावि० सुरवसेना,
पूर्णिया ।

Page No.

शास्त्री - II खण्ड साहित्य

रत्नावली

Date ___/___/______

अलमलमतिमात्रं साहसेनाऽमुना ते
त्वरितमपि विमुञ्च त्वं लतापाशमेतम् ।
चलितमपि निरोद्धुं जीवितं जीवितेशे
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥

उत्तरम् = प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि श्रीहर्षदेव विरचिता रत्नावली नाटिकाया तृतीयोऽङ्कात् उद्धृतोऽस्ति ।

व्याख्या - अयि जीवितेशे = हे प्राणेश्वरि, ते = तव, अमुना = अनेन, अतिमात्रम् = अत्यन्तम्, साहसेन = दुष्करकर्मणा । अलम् अलम् = पर्याप्तं पर्याप्तम् । त्वम् = भवती, एतत् = एनम्, लतापाशम् = लताबन्धनम् । त्वरितम् = द्रुतम् । विमुञ्च = त्यज । चलितम् = प्रस्थानोन्मुखम् = निःसरितुमित्यर्थः । अपि मम = स्वप्रियतमस्य जीवितम् = जीवनम् । निरोद्धुम् = गमनादे वारयितुम् । इह = अत्र, (मम) कण्ठे = गलदेशे, क्षणम् = स्वल्पकालम् । बाहुपाशम् = भुजलता, बन्धनम् । निधेहि = धारय । मां गाढमालिङ्गयेत्यर्थः । अत्र पर्यायोक्तिरलङ्कारः । मालिनीवृत्तम् । तद्यथा - ननमयययुतेयं मालिनी भोगिलोकैः ।

Renu Devi
14/09/20
राध्या उमाकान्त सं० महाविद्यालय सुखसेना, पूर्णिया ।

उपशास्त्री - I खण्ड साहित्य - तृतीय - प्रथम

काव्यदीपिका

Saathi

Date ___ / ___ / ___

प्र०(1) - विश्वनाथमते रीतेः किं स्वरूपम् ?

उत्तरम् - पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।

प्र०(2) - गौडीरीतेः किं स्वरूपम् ?

उत्तरम् - ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।
समासबहुला 'गौडी' दर्पणे समुदीरिता ॥

प्र०(3) - दण्डिमतेन अलङ्कारस्य किं स्वरूपम् ?

उत्तरम् - काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।

प्र०(4) - अलंकारस्य कति भेदाः ?

उत्तरम् - अलङ्कारस्य द्विभेदाः । शब्दगताः अर्थगताश्च ।

प्र०(5) - अनुप्रासः किम्प्रकारकः अलंकारः ?

उत्तरम् - अनुप्रासः शब्दालङ्कारः विद्यते ।

प्र०(6) अनुप्रासस्य किं लक्षणम् ?

उत्तरम् - अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

प्र०(7) यमकस्य किं स्वरूपम् ?

उत्तरम् - सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥

Renu Devi
14/09/20
राधा उमाकान्त सं० महावि० सुखसैना, पूर्णिमा ।

शास्त्री-Iखण्ड साहित्य

## अभिज्ञानशाकुन्तलम्

यथातेरिव शर्मिष्ठा भर्तुर्बहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति।

प्रस्तुत श्लोके महर्षि कण्वः स्नेहातिशयव्यञ्जकं वत्से इति सम्बोधनं प्रयुज्य तदनुरूपामाशिषं शकुन्तलामवलोक्य प्रयुङ्क्ते -

व्याख्या - वत्से! = धर्मकन्यके शकुन्तले! ययातेः = ययातिनाम्ना प्रसिद्धस्य सोमवंशीयस्य नृपतिनहुषपुत्रस्य शर्मिष्ठेव = तदभिधाना वृषपर्वणः पुत्री तन्महिषीव भर्तुः = पत्युर्दुष्यन्तस्य बहुमता = सम्मानिता प्रिया भव। सा शर्मिष्ठा पुरुं-तन्नामकं चन्द्रवंशस्य कर्तारं सम्राजं पुत्रमिव त्वमपि सम्राजं = चक्रवर्ती, सुतम् = आत्मजम् अवाप्नुहि = लभस्व।

अयंभावः - लज्जयावनतमुखीं वन्दमानां शकुन्तलां समवेक्ष्य सस्नेहमाशिषं ददत् महर्षिः कण्वो ब्रूते वत्से! यथा वृषपर्वणः पुत्री शर्मिष्ठा नहुषात्मजस्य राज्ञो ययातेः प्रधाना राजमहिषी चन्द्रवंशस्य विधातारं ययातिसिंहासनासीनं पुत्रमजनयत्, तथैव त्वमपि राजर्षेः दुष्यन्तस्य महादेवीषु प्रियतमा श्रेष्ठा सती भरतवंशस्य कर्तारं दुष्यन्तसिंहासनाधिकारिणं चक्रवर्तिनं तनयं प्राप्नुहि। अत्रोपमालंकारः अनुष्टुप् वृत्तम्।

Renu Devi
14/09/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया।